## ॥ चतुर्थोऽध्यायः ॥

ध्यानं

ॐ कालाभ्राभां कटाक्षैर् अरि कुल भयदां मौलि बद्धेन्दु रेखां
शङ्खं चक्र कृपाणं त्रिशिख मपि करैर् उद्वहन्तीं त्रिनेत्राम् ।
सिंह स्कन्दाधिरूढां त्रिभुवन मखिलं तेजसा पूरयन्तीं
ध्यायेद् दुर्गां जयाख्यां त्रिदश परिवृतां सेवितां सिद्धि कामैः ॥

ॐ ऋषिरुवाच ॥ १॥

शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन्दुरात्मनि सुरारि बले च देव्या ।
तां तुष्टुवुः प्रणति नम्र शिरोधरां सा
वाग्भिः प्रहर्ष पुलकोद्गम चारुदेहाः ॥ २॥

देव्या यया ततमिदं जगदात्म शक्त्या
निःशेष देवगण शक्ति समूह मूर्त्या ।
तामम्बिका मखिल देव महर्षि पूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥ ३॥

यस्याः प्रभाव मतुलं भगवा ननन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलं च ।
सा चण्डिकाखिल जगत्परिपालनाय
नाशाय चाशुभ भयस्य मतिं करोतु ॥ ४॥

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः

पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजन प्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥ ५॥

किं वर्णयाम तव रूप मचिन्त्य मेतत्
किञ्चातिवीर्य मसुर क्षयकारि भूरि ।
किं चाहवेषु चरितानि तवाद्भुतानि
सर्वेषु देव्यसुर देवगणादि केषु ॥ ६॥

हेतुः समस्त जगतां त्रिगुणापि दोषैः
न ज्ञायसे हरिहरादिभि रप्यपारा ।
सर्वाश्र याखिल मिदं जगदंश भूतं
अव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥ ७॥

यस्याः समस्त सुरता समुदीरणेन
तृप्तिं प्रयाति सकलेषु मखेषु देवि ।
स्वाहासि वै पितृ गणस्य च तृप्तिहेतुः
उच्चार्यसे त्वमत एव जनैः स्वधा च ॥ ८॥

या मुक्ति हेतु रविचिन्त्य महाव्रता त्वं
अभ्यस्यसे सुनियतेन्द्रिय तत्त्व सारैः ।
मोक्षार्थिभि र्मुनिभिरस्त समस्त दोषैः
विद्यासि सा भगवती परमा हि देवि ॥ ९॥

शब्दात्मिका सुविमलर्ग्य जुषां निधानं
उद्गीथ रम्य पद पाठवतां च साम्नाम् ।

देवि त्रयी भगवती भव भावनाय
वार्ता च सर्व जगतां परमार्ति हन्त्री ॥ १०॥

मेधासि देवि विदिताखिल शास्त्रसारा
दुर्गासि दुर्ग भवसागर नौरसङ्गा ।
श्रीः कैटभारि हृदयैक कृताधिवासा
गौरी त्वमेव शशिमौलि कृत प्रतिष्ठा ॥ ११॥

ईषत्सहास ममलं परिपूर्ण चन्द्र-
बिम्बानुकारि कनकोत्तम कान्ति कान्तम् ।
अत्यद्भुतं प्रहृत मात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ॥ १२॥

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालं
उद्यच्छशाङ्क सदृशच्छवि यन्न सद्यः ।
प्राणान् मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितान्तक दर्शनेन ॥ १३॥

देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि ।
विज्ञात मेत दधुनैव यदस्त मेतत्
नीतं बलं सुविपुलं महिषासुरस्य ॥ १४॥

ते सम्मता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्म वर्गः ।
धन्यास्त एव निभृतात्मज भृत्यदारा

येषां सदाभ्युदयदा भवती प्रसन्ना ॥ १५॥

धर्म्याणि देवि सकलानि सदैव कर्मानि
अत्यादृतः प्रतिदिनं सुकृती करोति ।
स्वर्गं प्रयाति च ततो भवती प्रसादात्
लोकत्रयेऽपि फलदा ननु देवि तेन ॥ १६॥

दुर्गे स्मृता हरसि भीति मशेष जन्तोः
स्वस्थैः स्मृता मति मतीव शुभां ददासि ।
दारिद्य दुःख भय हारिणि का त्वदन्या
सर्वोपकार करणाय सदार्द्रचित्ता ॥ १७॥

एभिर्हतै र्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम् ।
सङ्ग्राम मृत्यु मधिगम्य दिवं प्रयान्तु
मत्वेति नून महितान् विनिहंसि देवि ॥ १८॥

दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरा नरिषु यत्प्रहिणोषि शस्त्रम् ।
लोकान्प्रयान्तु रिपवोऽपि हि शस्त्र पूता
इत्थं मति र्भवति तेष्वपि तेतिसाध्वी ॥ १९॥

खड्ग प्रभा निकर विस्फुरणै स्तथोग्रैः
शूलाग्र कान्ति निवहेन दृशोऽसुराणाम् ।
यन्नागता विलयमं शुमदिन्दु खण्ड-
योग्याननं तव विलोकयतां तदेतत् ॥ २०॥

दुर्वृत्त वृत्त शमनं तव देवि शीलं
रूपं तथैत दविचिन्त्य मतुल्य मन्यैः ।
वीर्यं च हन्तृ हृतदेव पराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥ २१॥

केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रु भय कार्यति हारि कुत्र ।
चित्ते कृपा समर निष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥ २२॥

त्रैलोक्य मेत दखिलं रिपु नाशनेन
त्रातं त्वया समर मूर्धनि तेऽपि हत्वा ।
नीता दिवं रिपुगणा भयमप्यपास्तम्
अस्माक मुन्मद सुरारि भवं नमस्ते ॥ २३॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टा स्वनेन नः पाहि चाप ज्यानिः स्वनेन च ॥ २४॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणे नात्म शूलस्य उत्तरस्यां तथेश्वरि ॥ २५॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थ घोराणि तै रक्षास्मांस्तथा भुवम् ॥ २६॥

खड्ग शूल गदादीनि यानि चास्त्रानि तेऽम्बिके ।

कर पल्लव सङ्गीनि तैरस्मान् रक्ष सर्वतः ॥ २७॥

ऋषिरुवाच ॥ २८॥
एवं स्तुता सुरैर्दिव्यैः कुसुमै र्नन्दनोद्भवैः ।
अर्चिता जगतां धात्री तथा गन्धानुलेपनैः ॥ २९॥

भक्त्या समस्तै स्त्रिदशै र्दिव्यै र्धूपैस्तु धूपिता ।
प्राह प्रसाद सुमुखी समस्तान् प्रणतान् सुरान् ॥ ३०॥

देव्युवाच ॥ ३१॥
व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम् ॥ ३२॥

देवा ऊचुः ॥ ३३॥
भगवत्या कृतं सर्वं न किञ्चि दवशिष्यते ॥ ३४॥

यदयं निहतः शत्रुर् अस्माकं महिषासुरः ।
यदि चापि वरो देयस् त्वयास्माकं महेश्वरि ॥ ३५॥

संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ।
यश्च मर्त्यः स्तवैरेभिस् त्वां स्तोष्य त्यमलानने ॥ ३६॥

तस्य वित्तर्द्धि विभवैर् धन दारादि सम्पदाम् ।
वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ॥ ३७॥

ऋषिरुवाच ॥ ३८॥
इति प्रसादिता देवैर् जगतोऽर्थे तथात्मनः ।

तथेत्युक्त्वा भद्रकाली बभूवान्त र्हिता नृप ॥ ३९॥

इत्येतत्कथितं भूप सम्भूता सा यथा पुरा ।
देवी देवशरीरेभ्यो जगत्त्रय हितैषिणी ॥ ४०॥

पुनश्च गौरी देहात्सा समुद्भूता यथाभवत् ।
वधाय दुष्ट दैत्यानां तथा शुम्भ निशुम्भयोः ॥ ४१॥

रक्षणाय च लोकानां देवाना मुपकारिणी ।
तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते ॥ ४२॥

। ह्रीं ॐ ।
॥ इति श्रीमार्कण्डेय पुराणे सावर्णिके मन्वन्तरे
देवीमाहात्म्ये शक्रादि स्तुति र्नाम चतुर्थोऽध्यायः ॥ ४॥